# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा -आचार्यद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – २ | |
| विषयः - वास्तुशास्त्रम् | (C.C.- 5.3.7. Old & New ) | गुणाः - ७० |
| दिनाङ्कः - १०/१०/२०१९ | ग्रन्थः प्रासादमण्डनम् | समयः -०३.०० तः ६.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः कस्यचित् एका कारिकायाः सान्वयं व्याख्यां कुरुत। (५)**

(१) प्रासादाकारपूजाभिर्देव-दैत्यादिभिः क्रमात्।
चतुर्दशसमुत्पन्नाः प्रासादानां च जातयः (सुजातयः)॥

(२) शिलान्यासस्तु रोहिण्यां श्रवणे-हस्त-पुष्ययोः।
मृगशीर्षे च रेवत्या-मुत्तरात्रितये शुभः॥

**प्रश्नः २** प्रासादनिर्माणे खातविधिः दर्शयत। **(१०)**

**अथवा**

दिक्शोधनं ग्रन्थाधारेण वर्णयत्।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां कुरुत। (५)**

(१) चतुरस्त्रायताष्टास्त्रा वृत्त (स्तरे?) कृत्तायता तथा।
जगती पर्श्वया प्रोक्ता प्रासादस्यानुरूपतः॥

(२) तदुच्छ्रायं भजेत् प्राज्ञस्त्वष्टाविंशतिभि : पदैः।
त्रिपदो जाऽ्यकुम्भश्च द्विपदं कर्णकं (कणकं?)तथा॥

**प्रश्नः ४** जगतीस्वरूपं ग्रन्थाधारेण प्रदर्शयत। **(१०)**

**अथवा**

प्रासादनिर्माणे तोरणविधिः स्पष्टयत।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां कुरुत। (५)**

(१) सूर्यदिग् वस्तुभागैश्च गजवाजि-नराः क्रमात्।
वाजिस्थानेऽथवा कार्यं स्व-स्वदेवस्य वाहनम्॥

(२) कलशोऽष्टौ द्विसार्द्धं तु कर्तव्यमन्तरालकम्।
कपोतिकाष्टौ मञ्ची स्यात् (च) कर्तव्या नवभागिका॥

**प्रश्नः ६** प्रासादे पीठोदयमानं ग्रन्थाधारेण स्पष्टयत्। (१०)

**अथवा**

स्तम्भमण्डोवरसमन्वयं ग्रन्थाधारेण वर्णयत।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितयोः कस्यचित् एका कारिका सान्वयं व्याख्यात।** (५)

(१) चतुरस्त्री कृते क्षेत्रे दशभागविभाजिते।
भित्तिर्द्विभागं कर्तव्या षड्भागं गर्भमन्दिरम्॥

(२) सपादं शिखरं कार्यं सकर्णं शिखरोदयम्।
सपादकर्णयोर्मध्ये रेखाः उदये ? स्युः पञ्चविंशतिः॥

**प्रश्नः ८** द्वारानुसारेण बिम्बमानं ग्रन्थाधारेण दर्शयत। (१०)

**अथवा**

प्रासादे ध्वजारोपणविलम्बे दोषाः प्रदर्शयत।

**प्रश्नः ९ अधोललिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु।** (१०)

(१) प्रासादमण्डनम् इति ग्रन्थे मिश्रकलक्षणं कस्मिन् अध्याये वर्तते।
(२) उत्तमजातिप्रसादाः कति ?
(३) वैशाखमासे प्रासादारम्भे किं फलम् ?
(४) रोहिणीनक्षत्रे प्रासादारम्भं कर्तुं शक्यते न वा ?
(५) कूर्मपृष्ठभूम्याः लक्षणं किम् ?
(६) उत्तराप्लवा भूमिः शुभा व अशुभा ?
(७) पूर्वदिशायाः दिक्पालः कः ?
(८) प्रासादारम्भावसरे दिक्पालानां पूजनं भवति न वा ?
(९) मीनसंक्रान्त्यां प्रासादारम्भं कर्तुं शक्यते न वा ?
(१०) देवालये ध्वजायः प्रयुज्यते न वा ?
(११) सिंह आयस्य दिशा का ?
(१२) प्रासादनिर्माणे नाडीवेधस्य विचारः भवति न वा ?
(१३) शिलान्यासप्रसङ्गे वास्तुपदमण्डलदेवानां बलिदानं दातव्यं न वा ?
(१४) शिवस्याग्रे अन्यदेवस्य दृष्टिवेधे किं फलम् ?
(१५) प्रासादे उदुम्बरस्य स्थापना भवति न वा

--००--